**अवधारणा {AWADHARANA}**
{A Peer-Reviewed Multidisciplinary, Open Access & NepJOL Indexed Journal}
Volume 9, 2025 {Print ISSN: 2505-080x}
Email: loktantrik066@gmail.com
URL: https://nepjol.info/index.php/awadharana
Copyrights: *Copyright 2025 Author/s and Creative Democrat Academy, Pokhara, Nepal. This work is licensed under a Creative Commons Attribution- Non Commercial* 4.0 International License
***Publisher***
*Creative Democrat Academy*

# लकारार्थविचारे कृतौ कर्तरि वा तच्छक्तिसमीक्षणम्

**डा.भोलानारायणरेग्मी {Dr. Bhola Narayan Regmi}**
श्रीविन्दुवासिनीसंस्सृतविद्यापीठम्, पोखरा
{Shree Vinduwasini Sanskrit Vidyapeeth (Campus), Pokhara}

**Article History:**
Receved 16 August 2025; Reviewed: 29 September 2025; Accepted 15 October 2025
**Corresponding Author:**
Bhola Narayan Rgmi, Email : drbholanarayanremi@gmail.com
ORCID ID : https://orcid.org/0009-0007-1223-8330
DOI : https://doi.org/10.3126/awadharana.v9i1.86197

**सारः**

वेदस्य षडङ्गेषु मुखमिव मुख्यत्वाद् व्याकरणं प्रधानं विद्यते । तत्र मुख्यतत्त्वस्य कारणमपि 'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्' इति सर्वसिद्धान्तस्य सिद्धत्वात् । अतो व्याकरणशास्त्रं सर्वैरपि संस्कृताऽध्येतृभिरनिवार्यत्वेन पठ्यते पाठ्यते च सर्वत्र संस्कृताध्ययनस्थलेषु । वर्तमाने प्रसिद्धस्य व्याकरणशास्त्रस्य पठने पाठने च द्विधा व्यवस्था प्रसिद्धा वर्तते । एका आरोहा , अपरा चावरोहा , आरोहाया नाम प्राचीनव्याकरणं वर्तते । अवरोहायाश्च नाम नव्यव्याकरणं विद्यते । नव्यव्याकरणस्य परम्परायाम् प्रक्रिया - परिष्कार- दर्शनपक्षस्य च भेदान् दृश्यन्ते । प्रक्रियाया आरम्भक्रमे रामचन्द्राचार्येण प्रणिता प्रक्रियाकौमुदी भट्टोजीदीक्षितस्य वैयाकरणसिद्धान्तकौमुदी वरदराजाचार्यस्य मध्यसिद्धान्तकौमदी लघुसिद्धान्तकौमुदी च प्रसिद्धा ग्रन्था विलसन्ति । तेषु भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां संज्ञा- सन्धि - षड्लिङ्ग - अव्यय - स्त्रीप्रत्यय - कारक - समास - तद्धित - तिङन्त - प्रत्ययमाला - आत्मनेपद - परस्मैपद - भावकर्म - कर्मकर्तृप्रक्रिया- लकारार्थ - कृदन्त - उणादि - वैदिक - स्वर -फिट् - लिङ्गानुशासनरूपेण प्रकरणानां विभाजनं वर्तते । इयं नव्यस्य व्यवस्था वैज्ञानिकी वर्तते , यतो हि प्रथमं तावत् संज्ञाप्रकरणादेव ज्ञायते यत् संज्ञिनो ज्ञानार्थं प्रथमं संज्ञायाः (नाम्नः) ज्ञानमेव आवश्यकं विद्यते । सुबन्तानां निरूपणात् पश्चात् अव्यय - स्त्रीप्रत्यय - कारकः - तद्धितानां निरूपणानन्तरं तिङन्तप्रकरणं विद्यते, तदपि समुचितमेव विद्यते । सर्वेषां सुबन्तानां सहकारित्वात् । 'अपदं न प्रयुञ्जीत' इति भाष्यसिद्धान्तस्य लोके शास्त्रे च सिद्धत्वात् , अपि च 'सुप्तिङन्तं पदम्' इत्यनुशासनात् सुबन्तानां निरूपणानन्तरं तिङन्तानां निरूपणावसरे तिबादि - ङान्तघटक - दशप्रत्ययेषु तिङ्पदस्य 'आदिरन्त्येन सहेता' इति पाणिनिसङ्केतसम्बन्धेन शक्त्या तेषां स्थानिनां लडादीनां -दशलकाराणां के के अर्थाः पुनश्च लकाराणां शक्तिनिर्धारकस्य 'लः कर्मणि च भावे चाकर्मकेभ्यः' इति सूत्रेण कर्तरि कर्मणि भावे च सङ्केतिता अर्थाः सन्ति । तेषु सकर्मकाणाम् अकर्मकणाम् च धातूनां निर्धारणपूर्वकमेवार्थाः संसाधिताः, तत्र व्याकरणशास्त्रं सर्वशास्त्रोपकारकं विद्यत इति विषये नैयायिकानां मीमासकानां तथा चाऽन्येषामपि विभिन्नानां शास्त्रकाराणां दार्शनिकानां विभिन्नानि मतानि सन्ति । तिबादीनां स्थानित्वेन निर्धारितानां लकाराणां नैयायिकैः कृतौ शक्तिः स्वीक्रियते परन्तु वैयाकरणैः तन्न मन्यते तच्च स्वमतं कर्तरि स्थापयितुं का वाचो युक्तिरिति विषयमादाय परमतखण्डनपूर्वकं स्वमतस्थापने प्रयतमानोऽयं लघुशोधो वरीवर्ति ।

**शब्दकुञ्जीः-** कर्ता, कृतिः , परोक्षः, लकाराः, वर्तमानः ।

## समस्योद्देश्यौचित्यकथनम्

वैयाकरणैर्मुख्यरूपेण स्वीकृतस्य वाक्यस्य सम्पादने प्रमुखकारणीभूतानां तिङन्तपदानां बीजभूतानां तिबादीनामष्टादशानां प्रत्ययानां तथा च तेषां स्थानिनां लकाराणामपि निर्धारितेषु कर्तृ - कर्म- भावेषु चार्थेषु कृतौ कर्मणि वा शक्तिरस्तीति विषये दशलकाराणां वर्तमानाद्यर्थविषयेषु च विवदमानानां पारस्परिकविरुद्धानां मतानां निर्धारणे सम्पतितानां तत्तद्विषयसमधियानानां च कृते समस्या जायन्ते ता एव विप्रतिपत्तिरूपाः समस्या अत्राधिगताः सन्ति । तासां विप्रतिपत्तीनां स्वमतसाधक - परमतबाधकयुक्त्या समाधानमेव प्रस्तुतस्यानुसन्धानस्य उद्देश्यं वर्तते । तत्र तत्र समागता विप्रतिपत्तीः सप्रमाणं समाधाय पाणिनीयानां निर्भ्रान्तज्ञानप्रदानमेव प्रस्तुतानुसन्धानस्य समुचितिं सिद्ध्यति ।

## अध्ययनविधिः

प्रस्तुते लघ्वनुसन्धाने सामग्रीसङ्कलनाय प्रमुखतया पुस्तकालयः प्रयुक्तः । ततो लकाराणां तदादेशानाञ्चार्थविषये लिखितान् ग्रन्थानधीत्य प्राथमिकस्रोतःसामग्रीरूपेण सङ्कलिता विद्यन्ते । एवमेव प्रकृतविषये विद्वद्भिर्लिखिता अनुसन्धानमूलका लेखाः सम्बद्धविषयपत्राणि विज्ञजनसंवादाश्च साक्षात्कारेण नवाधुनिकेन सञ्जालेन पुस्तकालयमाध्यमेन च द्वितीयस्रोतः सामग्रीरूपेण सामाश्रिताः सन्ति । तथा च इमाः सामग्रीः प्रयुज्य प्रत्यक्षसाधकप्रमाणेन स्वीयतर्कतथ्यविश्लेषणादिबलेन आगमन - निगमन - व्याख्यानविधिभिः सत्यतथ्यप्रयुक्तानि विषयवस्तूनि प्रकृते च लघ्वनुसन्धाने संस्थापितानि सन्ति ।

## पूर्वकार्यस्य समीक्षणम्

व्याकरणशास्त्रस्य प्रमुखस्थलस्य वाक्यस्फोटस्य सम्पादनाय बहुभिराचार्यैर्बहुत्र बहुधा परिचर्चाः कृताः वाक्यसम्पादने मूलभूतानि सुबन्तानि तिङन्तानि पदानि अपेक्षितानि भवन्ति, तयोस्तिङन्तानि पदानि प्रधानभूतानि तत्तदाचार्याः स्वीकुर्वन्ति । उक्तं च - 'सुप्तिङन्तचयो वाक्यम्' लघु - मध्य - वैयाकरणसिद्धान्तकौमुद्यादिप्रसिद्धव्याकरणस्य ग्रन्थेषु च 'एकतिङ् वाक्यम्' इति लिखितो वर्तते । तस्य व्याख्यानाऽवसरे एकतिङन्तपदघटितं वाक्यमिति फलितोऽर्थः । पुनश्च "सर्वं हि वाक्यं क्रियायां परिसमाप्यते" इति सिद्धान्तश्च तिङन्तस्य प्राधान्येन प्रमाणम् । क्रियात्वसम्पादनकारणीभूतानां तिबाद्यर्थानां आत्मनेपदस्थानां तादेशानां लकाराणां च शक्तिविषये वैयाकरणभूषणसारे परमलघुमञ्जूषायां सिद्धान्तमञ्जूषायां तत्तत्स्थानेषु च कौण्डभट्ट - नागेशभट्टाभ्यां लिखितेषु समुपलभ्यमानेषु उक्तग्रन्थेषु दशलकाराणामर्थाः के ? लकाराणां नैयायिकाभिमते कृतौ शक्तिर्वैयाकर्णानां कर्तरि इति विरुद्धयोः मतयोः मन्थनेन स्वमते निराकाङ्क्षार्थबोधो जायेत इति विचार्य तान् विषयान् समधिकृत्य लब्धविद्यावारिधेन गौडमहाभागेन "वैयाकरणप्रबन्धसंग्रहः" (सन् १९९६) इति ग्रन्थे तथा च लब्धविद्यावाचस्पतिना ठक्कुरमहाभागेन "प्रबन्धामृतम्" (वि.सं.२०५३) इत्याख्ये दार्शनिकग्रन्थेषु वैयाकरणानां सिद्धान्तान् समधिकृत्य लकारार्थविषये लकाराणां कृतौ वा कर्तरि शक्तिरिति च विषये विचाराः प्रस्तुताः सन्ति । तत्र यद् दशलकाराणां स्थाने विहितानां तिबाद्यादेशानां कर्तृ - कर्म - सङ्ख्या- कालारूपा अर्था निर्धारिताः फलितार्थाः सन्ति । अपि च नैयायिकैः स्वीक्रियमाणस्य लकाराणां कृतौ शक्तिखण्डनं स्वमते कर्तरि शक्तिस्थापनञ्च येन केन प्रकारेण यथाकथञ्चिद् प्रतिपादितं विद्यते । मूलग्रन्थानां लकारार्थप्रकरणेषु प्रतिपादिता विकीर्णा विषयास्तत्रापि विकीर्णा एव आसन् तान् सर्वान् विषयान् समेत्य यत्र तत्र सर्वत्र अनेकैर्विद्वद्भिः साक्षात् परम्परया वा लकारार्थास्तेषां शक्तयश्च समीक्षिता विश्लेषिता वा प्रस्फुटीकृताः सन्ति । तथा सति उपयुक्तानां चिन्तनानां सामान्यप्रसङ्गतया जृम्भितत्वाद् लघ्वनुसन्धानदृशा अपर्याप्तं निर्बलत्वञ्च । तत्र तत्र कृतानि तानि तानि चिन्तनानि तत्तद्विषयकान् नवाधुनिकान् परममूलान् च सिद्धान्तान् समाश्रित्य प्रवृत्तेऽपि यथावश्यकं स्थितिमादाय नैव प्रवृतानि प्रतिभान्ति । अथ च यत्र तत्र बहुषु ग्रन्थेषु एतद्विषये यद्यपि विश्लेषणं विहितं तेन विश्लेषणेन नैवाऽभिष्टसिद्धिर्दरीदृश्यते ।

तस्मात् सम्पादिते च लघुशोधे लकारार्थतच्छक्तिसम्बद्धान् विचारान् समादृत्य लडाद्यर्थे लकाराणां शक्तिविषये च समीक्षा प्रस्तुता विद्यते ।

**सैद्धान्तिकाधारः**

मूलतो वैयाकरणानां स्फोटवादे वाक्यस्फोटो मुख्यो वर्तते, तस्य वाक्यस्य सम्पादनं पदयोः पदानां वा समुहद्वारा भवति। तानि च पदानि सुबन्तानि तिङन्तानि च सन्ति। सुबन्तानि पदानि कारकत्वेन प्रसिद्धानि तिङन्तानि च पदानि क्रियापदत्त्वेन प्रसिद्धानि वर्तन्ते । तदाह - "सुप्तिङन्तचयो वाक्यम्" इति प्रमाण्येन सुबन्तापेक्षया तिङन्तानि पदानि प्रधानाङ्गानि इति सिद्धान्तास्य वाक्यसम्पादने प्राधान्यमाह तथा -सर्वं च वाक्यं क्रियया एव परिसमाप्यते इति भाष्यसिद्धान्तः सार्वजनीनो वर्तते लोके तेनैवार्थबोधनात्। तस्मिन् पदे एका प्रकृतिः, अपरे प्रत्यया भवन्ति। प्रकृतीनां "भू सत्तायाम्" "एध वृद्धौ" "श्रिञ् सेवायाम्" इत्यादिरूपेण पाणिनिना अर्थाः सङ्केतिताः यद्यपि तङां तेषां स्थानिनां लकराणामर्था "वर्तमाने लट्" "परोक्षे लिट्" "अनद्यतने लुट्" "अनद्यतने लङ्" "तान्येकवचनद्विवचनबहुवचनान्येकशः" "द्वेकयोर्द्विवचनैकवचने" "बहुषु बहुवचनम्" इत्यादि सूत्रमाध्यमेन लकारार्थाः कर्तृ - कर्म - सङ्ख्या - कालरूपाः संकेतिताः परन्तु तेषामर्थविषये यथा "भू" धातोः सत्तारूपेऽर्थे शक्तिः पाणिनिना सङ्केतितेऽपि अत्र तथा नास्ति, अतः तच्छक्तिनिर्धारणे विवदमानानां नैयायिकमिमांसकयोर्मतानि धिक्कृत्य स्वमतस्थापनार्थं वैयाकरणभूषणसारे मन्जूषात्रय्यां महाभाष्ये च कृतान् विचारान् बहुधा समीक्ष्य अस्मिन् शोधपत्रे सिद्धान्तान् निष्कर्षरूपेण संस्थापिताः सन्ति।

**विषयावतारः**

लकारादेशस्य तिङर्थस्य वा विचारप्रसङ्गे तत्र 'उच्चारितः शब्दः प्रत्यायको भवति नानुच्चारितः' इति भाष्याल्लोके तदनुभवाच्च लाघवेन शास्त्रप्रक्रियामात्रनिर्वाहाय स्थानित्वेन कल्पिते लकारे तिबादिगतां बोधजनकतां शक्तिं प्रकल्प्य लकारस्य विधानेऽपि 'यो यदर्थाभिधानसमर्थः स तस्यादेशः' इति न्यायेन लकारस्य प्रयोगघटकतया अनुच्चारितत्वेन च तिबादिशक्तिबोधन एव 'वर्तमाने लट्' (पा. सू. ३।२।१२३) इति 'लः कर्मणि च भावे चाकर्मकेभ्यः' (तत्रैव पा. सू. ३।४। ६९) इति च शक्तिग्राहकसूत्राणां तात्पर्यं वैयाकरणानां राद्धान्तः। सम्प्रति वैयाकरण दृष्ट्या लकाराणामर्थो निरूप्यते तत्र सङ्ख्याविशेष - कालविशेष - कारकविशेषभावाः, लादेशमात्रस्य अर्थाः। तथा हि लडादेशस्य वर्तमानकालः, शबादिसमभिव्याहारे कर्ता यक् चिण्समभिव्याहारे भावकर्मणी , उभयसमव्याहारे एकत्वसङ्ख्या चकारस्य अर्थो विद्यते। समभिव्याहृत्वञ्च पदविशिष्टत्वम्, वैशिष्टयञ्च स्वपूर्वत्व - स्वोत्तरत्व सम्बन्धेन। तदुक्तम् -

फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः।
व्यापारे शप्श्नमाद्यस्तु द्योतयन्ति क्रियान्वयम्॥ (भट्टः, वि.सं. २०५४ पृ. १८४)

फलव्यापारौ च धात्वर्थौ इति उक्तमेव तत्र तिङ्समभिव्याहारे तदर्थसङ्ख्यायास्तदर्थकारके विशेषणम्। कालस्तु व्यापारे विशेषणम्। तदाह -

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्॥ (कौण्डभट्टः, वि. सं. २०४५ पृ. ७)

तिङर्थः कर्ता व्यापारे कर्म च फले विशेषणम् । तिङर्थसङ्ख्या कर्तृप्रत्ययसमभिव्याहारे कर्तरि कर्मप्रत्ययसमभिव्याहारे च कर्मणिश विशेषणम् । 'भावप्रधानामाख्यातं' इति यास्कवचनात् क्रियायाः प्राधान्यबोधको 'भूवादयो धातवः' इति सूत्रस्थभाष्याच्च क्रियापदं करणव्युत्पत्या व्यापारपरं कर्मव्युत्पत्या फलपरम्। तथा च कर्ताख्याते कर्माख्याते वा सर्वत्र व्यापारमुख्यविशेष्यक एव शब्दबोधो भवति।

अत एव 'फले प्रधानं व्यापारः तिङर्थस्तु विशेषणम् ' इति वैयाकरणभूषणसारोक्तिः संङ्गच्छते। तथा च ग्रामं गच्छति चैत्र इत्यत्र ग्रामाभिन्नकर्मनिष्ठसंयोगानुकूलसमवायसम्बन्धावच्छिन्नैकत्वावच्छिन्न – एकत्वावच्छिन्न - चैत्राभिन्नाश्रयको वर्तमानकालिको व्यापारः । ग्रामो गम्यते मैत्रेण, इत्यादौ तु मैत्राश्रयको वर्तमानकालिकः समवायसम्बन्धावच्छिन्नैकत्वावछिन्नग्रामरूपकर्मनिष्ठसंयोगानुकूलो व्यापार इति प्राचीनवैयाकरणाः । नवीनास्तु कर्तृप्रत्ययसमभिव्याहारे व्यापारमुख्यविशेषकं, कर्मप्रत्ययसमभिव्याहारे च फलामुख्यविशेषकं शाब्दबोधं स्वीकुर्वन्ति । लकारार्थास्तु -

वर्तमाने परोक्षे श्वो भाविन्यर्थे भविष्यति।
विद्ध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेयाः लडादयः॥ (कौण्डभट्टः, वि. सं. २०४५ पृ. ८६ )

क्रमेण लट् - लिट् - लुट - लृट् - लेट् -लोट् ,एते षट् टितो लकारास्तत्र सर्वप्रथमं लुड् विचार्यते। वर्तमानेऽर्थे लड् भवति, 'वर्तमाने लट्' इति सूत्रात्। किन्नाम वर्तमानत्वमिति जिज्ञासायां कौण्डभट्टेनोक्तं यथा -

प्रारब्धापरिसमाप्तत्वं भूतभविष्यद्भिन्नत्वं वा वर्तमानत्वम् (तत्रैव पृ. ८६) इति लक्षणम्। नागेशेन तु- 'वर्तमानकालत्वं प्रारब्धापरिसमाप्तक्रियोपलक्षिततत्वम्' इति स्वीक्रियते। (भट्टः, वि. सं. २०४७ पृ. ६७१) पचति, इत्यादौ अधिश्रयाणात् - चुल्ल्युपरिस्थापनात् अधः श्रयणस्य ततः, अवतारणस्य मध्ये वर्तमाननां फूत्कारत्वादीनामुपक्रियाणां द्योतनाय वर्तमानकाले विधीयमानस्य लडादेशस्य प्रयोगः। 'आत्माऽस्ति', 'पर्वताः सन्ति' इत्यादौ तत्तत्कालिकानां राज्ञां क्रियाया अनित्यत्वात् तत्तद्विशिष्टस्य उत्पत्त्यादिकमादाय तेषां वर्तमानकालत्वं संगच्छते 'इह भूतभविष्यद्वर्तमानानां राज्ञां क्रियास्तिष्ठतेरधिकरणम्' इति भाष्योक्तेः। लडादिप्रत्ययमाध्यमेन वर्तमानत्वादि द्योत्यते, क्रियासामान्यवाचकस्य वर्तमानत्वादिविशिष्टक्रियायां लक्षणायां लडादेस्तात्पर्यग्राहकत्वेनोपयोगात्। परोक्षेऽर्थे लिड् भवति, 'परोक्षे लिट्' इति सूत्रात्। (पा. सू. ३।२।११५) कालस्तावद् द्विविधः -१ अद्यतनः २ अनद्यतनः। द्विविधोऽपि भूतभविष्यद्रूपः। तत्र अनद्यतने भूते परोक्षे लिडित्यर्थः संगच्छते। तेन अनद्यतने भूते अनद्यतने भविष्यति, भूतेऽप्यपरोक्षे च न लिट्प्रयोगः। परोक्षत्वञ्च 'साक्षात् करोमि' इत्येतादृशविषयताशालिज्ञानविषयत्वम्। भूतानद्यतनत्वञ्च अद्यतनाऽष्टप्रहरीव्यतिरिक्तत्वे सति भूतत्वम्। परोक्षत्वञ्च कारके विशेषणम् , न तु क्रियायां, तस्या अतीन्द्रियत्वेन 'परोक्षे लिट्' इति सूत्रे भाष्ये प्रतिपादनाद् व्यभिचाराभावत्, पिण्डीभूताया निदर्शयितुमशक्यत्वेऽप्यवकाशः 'साक्षात् करोमि ', इति प्रतीतिविषयत्वसम्भवात्। अन्यथा 'पश्य मृगो धावति' इत्यत्र तस्याः दर्शनकर्मता न स्यात्। कृभ्वाद्यनुप्रयोगस्थले कृभ्वसां क्रियासामान्यमर्थः, आम्प्रकृतेस्तु तत्तत्क्रियाविशेषः। सामान्यविशेषयोरभेदान्वयः, अकर्मकप्रकृतिकाऽ मन्तानुप्रयुक्तकृभ्वसामकर्मिकैव क्रिया।

वस्तुतस्तु - अनुप्रयुक्तानां कृभ्वसां फलशून्यक्रियासामान्यवाचकत्वमेव। सकर्मकाकर्मकत्वव्यवहारस्तु आम्प्रकृतिभूतधातोरेवेति निष्कर्षः। एवञ्च 'एधाञ्चक्रे चैत्र' इत्यत्र एकत्वावच्छिन्नपरोक्षत्वावछिन्नचैत्रकर्तृका - भूतानद्यतनकालाधिकरणका वृद्ध्यभिन्ना क्रियेति बोधः।

लुडर्थमाह - श्वो भाविनि - अनद्यतने भाविन्यर्थे लुड् भवति , 'अनद्यतने लुट्' (पा. सू. ३।३।१५) इति सूत्रात्। यथा - श्वो भविता इत्यादयः। लृडर्थमाह - भविष्यति- भविष्यत् सामान्येऽर्थे लृड् भवति , 'लृट् शेषे च' इति सूत्रात्। (तत्रैव ३।३।१३) यथा - घटो भविष्यतीत्यादयः। सामान्यभविष्यत्वञ्च वर्तमानप्रागभावप्रतियोगिसमयोत्पत्तिमत्वमिति कौण्डभट्टमतम्। तत्र वर्तमानप्रागभावप्रतियोगिक्रियोपलक्षिततत्वमिति नागेशमतम्। लेडर्थमाह -विध्यादौ छन्दसि वेदविषये लेड् भवति 'लिङर्थे लेट् ' इति सूत्रात्। (पा.सू. ३।४।७) लेट्लकारे धातोः 'लेटोऽडाटौ' (तत्रैव ३।४।३४) 'सिब्बहुलं लेटि' 'सिब्बहुलं णिद् वक्तव्यः' कात्यनस्य (तत्रैव) 'इतश्च लोपः परस्मैपदेषु' (तत्रैव ३।३।१७३) इत्यादिसूत्रेभ्यो विशिष्टं कार्यं भवति। यथा - भाविषति, भाविषाति इत्यादयः। व्याकरणस्य वेदरक्षणे प्रयोजनत्वाद् वेदप्रयुक्तलेट्लकारस्य ज्ञानं वैयाकरणानां परमावश्यकमिति बोध्येयम्।

लोडर्थमाह - विध्यादौ - विधिः , प्रेरणमित्यर्थः। निमन्त्रणामन्त्रणयोः - कामचारानुज्ञा, अधीष्टः - सत्कारपूर्वको व्यापारः। सम्प्रश्नः - सम्प्रधारण, प्रार्थना इत्यर्थः। इत्येतेष्वर्थेषु आशिषि चार्थे लोड् भवति, 'लोट् च' (तत्रैव ३।३।१६२) 'आशिषि लिङ्लोटौ' (तत्रैव ३।३।१७३) इति सूत्राभ्यां तथा अवगमात्।

अतः परं लङादिक्रमेण ङित्लकाराणामर्थो निरूप्यते -

तत्र लङ् - लिङ्- लुङ्- लृङ् एते चत्वारो ङितो लकारा भवन्ति। तदुक्तम् -

ह्यो भूते प्रेरणादौ च भूतमात्रे लङादयः।

सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृतः॥ ((कौण्डभट्टः, वि. सं. २०४५ पृ. ९४)

लङर्थमाह - ह्यो भूते - अनद्यतने भूतेऽर्थे लङ् भवति, 'अनद्यतने लङ्' इति सूत्रात्। यथा - अस्य पुत्रोऽभवत्। लिङर्थमाह - प्रेरणादावर्थे लिङ् भवति 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' इति सूत्रात्। (पाणिनिसूत्रम् ३।३।१६१) तत्र विधिः - प्रेरणम्, भृत्यादेर्निकृष्टस्य प्रवर्तनम्। निमन्त्रणम् - नियोगकरणम्, आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम् - प्रेरणेत्यर्थः आमन्त्रणम्- कामाचारानुज्ञा, अधीष्टम्- सत्कारपूर्वको व्यापारः, सम्प्रश्नः - सम्प्रधारणम्, अनुमतिर्वा। यथा- आगच्छतु भवान् जलं गृह्णातु , 'गच्छति चेत् भवान् गच्छतु' इत्यादयः। एतच्चतुष्टयानुगतप्रवर्तनात्वेन वाच्यता लाघवात्। तदुक्तम् -

अस्ति प्रवर्तनारूप मनुस्यूतं चतुर्ष्वपि।

तत्रैव लिङ्विधातव्यः किं भेदस्य विवक्षया ॥ (कौण्डभट्टः, वि. सं. २०४५ पृ. ९६)
न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा।
विद्ध्यादीनामुपादानां चतुर्णामादितः कृतम् ॥ (तत्रैव)

प्रवर्तनात्वञ्च - प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वम् । तच्चेष्टासाधनत्वस्याऽस्तीति तदेव विध्यर्थः । न तु प्रकृतिसाध्यत्वं तस्य यागादौ लोकत एव लाभात् इति अन्यलभ्यत्वात् । न च बलवदनिष्टाननुबन्धित्वं द्वेषाभावेनाऽन्यथासिद्धत्वात् । आस्तिक कामुकस्य नरकसाधनता ज्ञानदशायामप्युत्कटेच्छया द्वेषाभावदशायां प्रवृत्तेर्व्यभिचाराच्च । तस्मादिष्टसाधनत्वमेव प्रवर्तना इत्यर्थः साधितः ।

प्रेरणादाइत्यत्र आदिना आशिष्यर्थे हेतुहेतुमद्भावे चाऽर्थे लिङ भवतीत्यर्थः, 'आशिषि लिङ्लोटौ' , 'हेतुहेतु मतोर्लिङ्' इति सूत्राभ्याम् । यथा - यो ब्राह्मणायावगुरेत्तं शतेन यातयेदिति ।

लुङर्थमाह - भूते भूतसामान्येऽर्थे लुङ् भवति, 'भूते' इत्यधिकृत्य 'लुङ्' इति सूत्रात् । अत्र विद्यमानध्वंसप्रतियोगित्वं भूतत्वम् । तच्च क्रियायां निर्बाधमिति विद्यमानेऽपि घटे घटोऽभूदिति प्रयोगः । विद्यमानध्वंसप्रतियोगी घटाभिन्नाश्रयक उत्पत्त्याद्यनुकूलो व्यापार इति बोधः ।

कालो द्विविधः - अद्यतोऽनद्यतनश्च । आद्यस्त्रिविधः - भूतभविष्यद्वर्तमानभेदात् । अन्त्यो द्विविधः - भूतो भविष्यच्च । तत्र वर्तमाने लट् । भूतत्वमात्रे लुङ् । भविष्यमात्रे लङ्, तत्रैव परोक्षत्वविवक्षायां लिट् । तादृशे भविष्यति लुट् ।

लृङर्थमाह - सत्यमिति । क्रिया अतिपत्तिः - अनिष्पत्तिस्तस्यां गम्यमानायां भूते, भाविनि हेतुहेतुमद्भावे सति लृङित्यर्थः, 'लिङनिमित्ते लृङक्रियातिपत्तौ' इति सूत्रात् । लिङो निमित्तं हेतुमद्भावादि । यथा - सुवृष्टिश्चेदभविष्यत् सुभिक्षमभविष्यत् । बह्निनश्चेत् प्राज्वलिष्यदोदनमपक्ष्यदित्यादयः । अत्र बह्निभिन्नाश्रयक - प्रज्वलनानुकूलव्यापारभाव प्रयोज्यौदनाभिन्नाश्रयकविक्लित्त्नुकूलव्यापाराभाव इति शाब्दबोधः ।

**लकाराणां शक्तिविचारः**

'सर्वं हि वाक्यं क्रियया परिसमाप्यते' इति सिद्धान्तेन समेषां शब्दानां क्रियासमभिव्याहारेणैवार्थबोधजनकत्वात् समभिव्यहृता एव शब्दा अर्थबोधकाः, क्रियावाचकधातोः प्रयोगस्तु तदुत्तर - प्रत्ययमन्तरा न सम्भवति धातोश्च द्वये प्रत्ययास्तिङः कृतश्च तत्र तिङादेशिनां लकाराणां कृतौ शक्तिः कर्तरि वेति वैयाकरणनैयायिकयोर्मतद्वैतं विद्यते तथा हि - लकाराणां कृतावेव शक्तिर्लाघवात् न तु कर्तरि कृतिमतो व्यापारवतो वा कर्तृत्वेन तत्र लकारणां शक्तावनेककृति व्यापाराणां शक्ततावच्छेदकत्वे गौरवात् कृतित्वजातेः शक्यतावच्छेदकत्वे च लाघवात् पचतीत्यस्य पाकं करोतीति विवरणदर्शनेन पच्धातुप्रतिपाद्यस्य च पाकशब्देनाख्यातप्रतिपाद्यस्य यत्नार्थककरोतिना विवरणेन विव्रियमाणस्याप्याख्यातस्य यत्नार्थकत्वावश्यकत्वाच्च आख्यातस्य वाचकत्वमादेशिस्मरणद्वारेत्यपि तत्र मते इत्यन्यदेतत् । देवदत्त इत्यादिप्रथममान्तपदेन समभिव्याहृतेन कर्तुर्लाभाच्च । किञ्च - 'पीनोऽयं देवदत्तो दिवा न भुङ्ते' (मिश्रः, सन् २००४, पृ.१५७) इत्यत्र पीनत्वानुपपत्त्या रात्रिभोजनाक्षेप इति मूलिकया 'येन विना यदनुपपन्नं तेन तदाक्षिप्यते' इति युक्त्या अत्रापि कृतेः कर्तारं विना सर्वथा अनुपपत्त्या कर्तुराक्षेपेण लाभात् । 'अनन्यलभ्यो हि शब्दार्थः' इति सार्वजनीन्या प्रसिद्ध्योक्त्या अनन्यलभ्यकृतावेव शक्तेरौचित्याच्च । 'प्रकृत्यर्थप्रत्ययार्थौ सहार्थं ब्रूतः, तयोः प्रत्ययार्थः प्रधानमिति' (कौण्डभट्टः, वि.सं. २०४५, पृ. ४२) न्यायानुरोधेन आख्यातार्थे धात्वर्थो विशेषणम् । आख्यातार्थस्तु प्रथमान्तार्थे विशेषणम् । अनुकूलत्वमाश्रयत्वञ्च संसर्गः, तथा च - देवदत्तः पचतीत्यादौ विक्लित्यनुकूलव्यापारानुकूलकृत्याश्रयो देवदत्त इति बोधः । न च रथो गच्छतीत्यादौ रथस्या चेतनत्वाद् यत्नशून्यत्त्वेन ततो बोधानापत्तिरिति वाच्यमगत्या तत्र तत्र व्यापारे तदाश्रयत्वे वा लक्षणाऽङ्गीकारादिति तार्किका वदन्ति, तन्न मन्वते शाब्दिकाः । यद्यप्यत्रादेशिस्मरणकल्पनाभावरूपलाघवादिति युक्तेः प्रयोगान्तर्गततया आदेशानां नियतत्वाच्च वैयाकरणैरादेशानां वाचकत्वं स्वीकृतं, लकाराणां कृतावेवेत्युक्त्या नैयायिकैः स्थानिनां यद्वाचकत्वं प्रतिपादितं तद्युक्तिभिः, निराकृतं तैरतः प्रथमोपात्तत्वात् प्रथमं स्थानिनां वाचकत्वम् उत ! आदेशानामित्रैव विचारः कर्तव्यः, तथापि इह कर्तरि शक्तिर्न तु कृताविति शाब्दिकनयं व्यवस्थापयितुं तदनादृत्य कर्तरि शक्तिरिति विचार्यते तथाहि - पचत्युक्तेः पाककर्ता क ? इत्याकाङ्क्षायाः सत्त्वात्तदनुरोधेन कर्तरि शक्तेरौचित्यं प्रतिभाति इति सगर्वमुच्चैर्वदन्ति व्याकरणतत्वविदः। किञ्च तार्किकाणां नये पचन्तं चैत्रं पश्य , पचते देवदत्ताय देहि, पचमानस्य देवदत्तस्य द्रव्यमित्यादौ शतृ - शानजादीनामपि तिबादिवल्लादेशत्वाविशेषेण पचतीत्यादिभ्य इव तेभ्योऽपि कृतिमात्रबोधापत्तिः ।

न चेष्टापत्तिराश्रयिभावेन कर्मणि सम्प्रदाने च कृतेरन्वयात्। पाकानुकूलकृत्याश्रयं चैत्रं पश्य इत्याद्यर्था अङ्गीकारे, अदोषादिति वाच्यम् भेदसंसर्गावच्छिन्न- नामार्थनिष्ठ- प्रकारता - निरूपित -विशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति प्रत्ययजन्योपस्थितिः कारणमिति कार्यकारणभावमूलकनामार्थयोरभेदादितिरिक्तः सम्बन्धोऽव्युत्पन्नः इति स्वपरसिद्धान्तव्युत्पत्तिभङ्गापत्तेः। कृतौ शक्तिरिति मते तु पाकानुकूला कृतिः कस्मिन् कस्य वेत्याकाङ्क्षा स्यात्। न च कर्तरि शक्तावेककर्तृका पचिक्रियेति शाब्दबोधाभ्युपगमेऽपि कः ? इत्याकांक्षा नोपपद्यत एवेति वाच्यं कर्तृसामान्यबोधे सति कः ? इति कर्तृविशेषाकाङ्क्षायां बाधकाभावात्।

यत्तु देवदत्तकर्तृका पचिक्रियेत्युक्तेषु कस्मिन्नस्ति कस्य वेत्याकाङ्क्षा वैयाकरणनां मतेपि दुर्वारैवेति तन्न, विक्लत्यनुकुलव्यापारस्यैव पचिक्रियात्वात्तदाश्रयस्य देवदत्तस्य कर्त्तृत्वात् क्रियाश्रयत्वे निश्चिते कस्मिन्नत्याकांक्षाया अप्रवृत्तेः । फलमुखगौरवस्य दोषानाधायकत्वेन नामार्थयोरभेदसर्गान्वयबोधकव्युत्पत्यनुरोधेन च शत्रादीनां कर्त्तरि शक्तिस्तिबादीनां कृतावेवेति वक्तुं न शक्यते तार्किकैरादेशानां बहुत्वेन तेषां वाचकत्वे गौरवाल्लाघवात् स्थान्येव वाचक इति हि तेषां सरणिः।एवञ्च तिबादीनां सूत्रादीनां च स्थानिस्मारकतया लिपिस्थानीयत्वं बोधकस्तु लकार एव स च शत्राद्यन्ते कर्तरि शक्तः, तिबाद्यन्ते कथं कृतिं बोधयेत् , अन्यायश्च अनेकार्थत्वमिति न्यायात्। शानजादौ कृतिर्लकारार्थ आश्रयः शानजर्थ इत्यस्तु कर्तरि कृत् इत्यानुशासनादिति तु सर्वथा अयुक्तं स्थान्यर्थाभिधान - समर्थस्यैवा देशत्वमिति न्यायात्। स्थान्यर्थेन निराकाङ्क्षतया शानजादौ कर्तरि इत्स्यप्रवृत्तेः। अनाकाङ्क्षेऽपि शास्त्रप्रवृत्तौ घञादावपि प्रवर्तेत। किञ्च भावे कर्मणि च शानचो दौर्लभ्यात् 'शय्यमाने आस्यमाने चायं गतः' इति भावे क्रियमाण इति कर्मणि प्रयोगो न स्यादेव। किञ्च शक्तिग्रहं व्याकरणोपमानेति प्राचीनोक्त्याऽर्थविशेषपुरस्कारेणैव साधुत्त्व भाष्यसम्मतत्वेन पदसमयपरिपालनाय व्याकरणं प्रवृत्तमिति न्यायभाष्योक्त्या च शक्तिग्राहकमेव व्याकरणं न तु साधुत्वमात्रार्थकम् एवञ्च यद् आह - व्याकरणं तदस्माकं प्रमाणं तार्किकैरपि तन्मन्तव्यमेव , एवं सति 'लः कर्मणि च भावे चाकर्मकेभ्यः' इति सूत्रं कर्तरि लकारशक्तिं ग्राहयति तत्र हि कर्तरि कृदित्यतश्चकारेण कर्तरि इत्यनुकृष्यते (पाणिनिः, सन् १९९२, ३।४।६९) बोधकतारूपां तिबादिशक्तिं तत्स्थानित्वेन कल्पिते लकारे परिकल्प्य लकाराः कर्मणि कर्तरि च तेन विधीयन्ते। नकारविसर्गादिनिष्ठां कर्मकरणादि - बोधकतां शक्तिमादाय शसादिविधानात्। इत्थं शक्तिग्राहकशिरोमणिभूतेन व्याकरणेन बोधितायाः कर्तरि लकारशक्तेः, त्यागे तव को हेतुरिति नैयायिकः प्रष्टव्यो बीजाभावात् कृतौ लकारशक्तिवादी तार्किको दण्डभाक् किन्न स्यात् ? अपरे तार्किकाः पक्ता देवदत्त इत्यादौअभेदान्वयोपपत्तये कर्तरि कृदित्यत्र कर्तृपरत्वेन क्लृप्तस्यापि कर्तृपदस्य लाघवरूपविनिगमकसद्भावेन प्रकृते शब्दाधिकाराश्रयणेन 'द्वेकयोर्द्विवचनैकवचने' 'ब्राह्मणो जानपदाख्यायाम्' इत्यादौ भावप्रधाननिर्देशस्य सूत्रकृच्छैली सिद्धत्वेन धर्मपरत्वे ऋषिस्वारस्यनुमानेन लःकर्मणीत्यत्र चकारानुकृष्टकर्तृपदस्य कर्तृत्वपरात् कृञो यत्नवाचकत्वेन तत्प्रकृतिककर्त्रर्थ तृजन्तकर्तृशब्दस्य कृत्याश्रयवाचकतया तदुत्तरभावप्रत्ययेन प्रकृत्यर्थप्रकारीभूतधर्मबोधनात् कर्तृपदस्य प्रकृते कृत्यर्थकत्वेन कृतौ लकाणां शक्तिरित्यत्र न शक्तिग्राहकं व्याकरणं प्रतिकूलं ममेति तन्न शब्दाधिकारस्यनेकशक्ति कल्पनाया दुषितत्वेन गौरवपराहतत्वात्। ' अतो गुणे' ( पाणिनिः, तत्रैव ६।१।९७) इत्यतो अत इत्यवृत्तयैव सिद्धे 'अव्यक्तानुकरणस्यातः' (तत्रैव ५।४।५७) इति सूत्रे अत इति करणेन शब्दाधिकारस्य प्रमाणसापेक्षत्वसूचना 'ष्णान्ताःषडिति सूत्रे 'न चान्यार्थं प्रकृतमनुवर्त्तनादन्यद् भवति' 'नहि गोधा सर्पन्ती सर्पणादहिर्भवति इति भाष्योक्त्या शब्दाधिकारस्यावहेलनाच्च।

अस्तु वाऽर्थाधिकारः, मास्तु वा, 'कर्त्तरि शक्तिस्वीकारेऽपि व्यापाराश्रयस्य कर्त्तृत्वेन व्यापारस्य धातुलभ्यत्वान्न लकाराणां तदंशे शक्तिरनन्यलभ्यो हि शब्दार्थः इति न्यायात् तस्यान्यलभ्यत्वात्। एतेन कृतिमतो व्यापारवतो वा कर्तुः शक्यत्वे अनेककृतिव्यापाराणां शक्त्यतावच्छेदकत्वकल्पने गौरवमिति नैयायिकाद्युक्तं दूषणमज्ञानविजृम्भितमिति सूचितम्। रथो गच्छति जानातीत्यादौअवगत्या व्यापारे तदाश्रये वा लक्षणायां लक्ष्यतावच्छेदकत्वेव शक्यतावच्छेदकत्वस्यापि गुरूणि स्वीकारे बाधकाभावाच्च।

यत्तु शतृशानचोः कृतिवाचकत्वे 'पचन्तं चैत्रं पश्य' 'पचमानो देवदत्तः' इत्यादौ सर्वानुभवसिद्धाभेदान्वयबोधानुपपत्त्या तयोः कर्तृवाचकत्वं लडादेशत्वबोधनफलं तु धात्वर्थे वर्तमानत्वप्रतीतिरेव लकाराणां तु कृतिवाचकत्वमेवेति तदपि तुच्छम्, -

तरबाद्यन्ततिङ्क्ष्वस्ति नामता कृत्स्विव स्फुटा।
नामार्थयोरभेदोऽपि तस्मात्तुल्योऽवधार्यताम्॥ (कौण्डभट्टः, वि.सं. २०४५ पृ. २९४)

इति युक्तेस्तथाहि - 'पचतितरां मैत्रः इत्यादौ नामार्थत्वभेदान्वययोः संम्भावात् कृदिव तिङां लकाराणां वा कर्तृवाचकत्वाश्यकत्वात्।

किञ्च लकाराणां कृतौ शक्तिरित्यभ्युपगच्छतां मते युष्मदस्मदोर्लकारेण सामानाधिकरण्याभावात्' युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः' 'अस्मद्युत्तमः' इत्याभ्यां सूत्राभ्यां सामानाधिकरण्यप्रयुक्ता पुरुषव्यवस्था न स्यात्, कर्तुर्वाच्यत्वे सुष्ठूपपद्यत अतः पुरुषव्यवस्थापि तिङां कर्तुर्वाच्यत्वे प्रमाणम्। अभिहिते प्रथमा कर्तरिति शेष इत्यादिकं च मन्मते अनुकूलं कथं कर्तुरवाच्यत्वे भवन्मते संगच्छेत। तथा च तत् प्रामाण्येन 'पाचको देवदत्तः' इत्यादाविव 'देवदत्तः पचति' इत्यादावपि 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपिमध्यमः' (पाणिनिः, १।४।१०५।) इति सूत्रानुवादबोधितसूत्रकृत् अनुभवसिद्धसामानाधिकरण्यानुभवेन कर्तुर्वाच्यत्वं निर्दुष्टम्।

किञ्च आख्यातस्य कृतिवाचकत्वे अभिधानानभिधान - व्यवस्था उच्छेदापत्तिस्तथा च चैत्रः पचति इत्यादावपि तृतीयापत्तिर्दुर्वारा न चानभिहिते इति सूत्रस्य अनभितसङ्ख्याके इत्यर्थवर्णनेन तत्रादोषः, कृत्ततद्धितसमासैः संख्याभिधानस्याप्रसिद्धत्व्। ततश्च पक्तव्यः, तण्डुल, शत्यः शतिक अश्वः, प्राप्तोदको ग्रामः, इत्यादिषु 'कर्मणि द्वितीया' इत्यस्य प्रवृत्तौ प्रथमा न स्यात्। पक्ता देवदत्त इत्यादौ तृतीयापत्तिश्च स्यात्। न च कर्तृकरणयोरित्यात्राप्युक्तरीत्या भावप्रधान - निर्देशमाश्रित्य कृतावनभिहितायां तृतीया इत्यर्थकरणे चैत्रः पचतीत्यादौ तिङाविशेष्यतया पक्ता चैत्र इत्यादौ कृताविशेषणतया च कृतेरभिधानात् न पचति चैत्र इत्यादौ पक्ता चैत्र इत्दौ च कर्तुरवाच्यत्वानभ्युपगमे तृतीयापत्तिरिति वाच्यं "क्रियते घटः चैत्रेण" इत्यादौ अपि तन्मते करोतेः कृतिवाचकत्वाविशेषेण धातुना कृतेरभिधानेन तृतीयानुपपत्तेः। अभिधानं तु तिङ्कृत्तद्धितसमासैरिति परिगणनस्य जागरूकतया धातुनाऽभिधानेऽपि न तत्र दोष इति न विदुषां सन्तोषजनकम्। 'विषवृक्षोऽपि सम्वर्द्ध्य स्वयं छेत्तुमसाम्प्रतम्' (दीक्षितः, वि.सं.२०४० पृ. १६०) 'क्रमादमुं नारद इत्यबोधि सः' इत्याद्यनुरोधेन तस्योपलक्षणत्वादत एव मूले प्रयेणेति संगच्छते। किञ्च 'रथो गच्छति' तण्डुल पच्यते स्वयमेवेत्यादौ च अचेतने रथादौ कृतेर्बाधिततया अगत्या तत्र तत्र व्यापारे आश्रये वा लक्षणाया अवश्याभ्युपेयत्वेन तत्र तिङा कृतेरभिधानेन रथादेः, तृतीयापत्तिर्दुर्वारा। कर्तृकरणयोरित्यत्र कर्तृपदस्य कृत्याश्रयोभय परत्वेनानभिहिते आश्रये अनभिहितायां कृतौ च तृतीया इत्यर्थस्तु गौरवादिदोषदूषितत्वेन दुर्वच इति न तावता रथादेस्तृतीया वारयितुं शक्या। किञ्च कर्तरि कृदिति यत्कर्तृग्रहणं तदेव लः कर्माणीति सूत्रे चकारेण अनुकृष्यते इति कथं 'ण्वुलादीनां लकारादीनां च शक्तौ वैलक्षण्यम्'। शब्दाधिकारमभ्युपेत्य स्वीक्रियेत चेत् लाघवात् एव अत्र अर्थाधिकारः। कृतामपि कृतिर्वाच्या च स्यात्। न च केवलकृतौ प्रयोगाभावः, आख्यातेऽपि समत्वात्। अभेद - संमसर्गान्वयानुरोधस्तु न उक्तोतरत्वात्।

ननु पचति रूपं देवदत्त इत्यादौ समुदायस्य नामत्वेऽपि तिङ्प्रत्यायो न नामेति न तिङन्ते अभेदान्वयानुरोधो लकाराणां कर्तुर्वाच्यत्वे हेतुरिति चेत्? पाचकः, पचमान इत्यादावपि अक इति सानजित्येतन्न नामेति तुल्यं ततश्चात् अत्र प्रशस्त - पाककर्ता देवदत्त इत्याद्यभेदान्वयो भवद्भिरभ्युपगन्तव्य इति तिङ्क्ष्वपि कर्तुर्वाच्यता स्वीकर्तव्यैव। किञ्च फलव्यापारौ धात्वर्थः, लकाराणां कृतौ शक्तिरिति वदतो नैयायिकस्य व्याघातः कृतेरपि व्यापारविशेषतया प्रायेण धातुत एव लाभात्। किञ्च कृतेर्वाच्यत्वे सौकर्यातिशयद्योतने अकर्मकात् पच्धातोर्भावे लकारे पच्यते ओदनेन इत्यादौ कर्मवद् भावेन ओदनपदाद् द्वितीयापत्तिः परत्वात् तृतीयेति न, अतिदिश्यमानधर्मविरुद्धस्वाश्रयस्यातिदेशस्वभावविरुद्धत्वात्। राद्धान्ते कर्तुर्वाच्यत्वे लकारवाच्य एव कर्ता कर्मवदित्यर्थे भावे प्रत्यय च कर्तुर्लकारेण अनुपस्थितेरदोषः।

अत एव कृत्य- क्त- खलर्थाः कर्मकर्तरि न भवन्ति तार्किकमते तु कर्तुः कुत्रापि लकारवाचत्वाभावेन तदर्थस्यैवाभावः स्यात्। "पाचकः" इत्यस्य पचतीति विवरणं च न स्यात् ,असमानार्थत्वात्। कृतित्वं शक्यतावच्छेदकमाश्रयत्वञ्च लक्ष्यतावच्छेदकं कृतिश्च शक्यतावच्छेदिकेति गौरवम्। आश्रयवाचकत्वे सर्वत्राश्रयत्वमेव शक्यतावच्छेदकमिति प्रत्युत कर्तुर्वाच्यत्ववादिनो मम शाब्दिकस्यैव लाघवम्। किञ्च लकाराणां कृतिवाचकत्वे कालस्य कृतौ क्वचिच्च चेतने कर्तरि व्यापारे वाऽन्वयः, एवञ्च परस्परजन्यशाब्ददबोधे व्यभिचारवारणाय अव्यवहितोत्तरत्वादिप्रवेशेन नानाकार्यकारणभावकल्पने गौरवम्। आश्रयवाचकत्वे तु सर्वत्र व्यापार एव कालान्वयेनैक एव कार्यकारणभाव इत्यति लाघवम्। एवम् आख्यातार्थसंख्यायाः तन्मते समभिव्याहृतप्रथमान्तार्थे एव अन्वयाद् देवदत्तो भुक्त्वा व्रजति, इत्यादौ क्त्वार्थे सङ्ख्यान्वयवारणाय इतराविशेषणत्वघटितः कार्यकारणभावः कल्प्यः , तत्र इतरत्वेन जगतः प्रवेशान् महद् गौरवं मम तु न तथा। उक्त - रीत्या विवरणानुरोधेन कृतिवाचकत्वं लकाराणां यदुक्तं तदपि रथो गमनं करोति, बीजेन अङ्कुरः कृत, इत्यादौ अचेतने कृतेर्बाधेन करोतेर्यात्नार्थकताया असिद्धेः परास्तम्। किञ्च एवं ज्ञायते घटः स्वयमेव इतिवत् क्रियते घटः स्वयमेव

इत्यपि न स्यात् । किञ्च करोतेर्यत्नार्थकत्व यत्नवाचकत्वाविशेषेण घटे यतते इतिवत् कटे करोति इत्यपि स्यात् । लक्षणादिना निर्वाहस्तु गौरवेण पराहन्तव्यः । प्रत्यार्थप्रधानबोधिकायायुक्तेरजेत्यादौ व्यभिचारितत्वेन असार्वत्रिकत्वात् । भावप्रधानमाख्यातमिति यास्कवचनेन बाधितत्वाच्च । अतो लकाराणां कर्तरि शक्तिः सिद्ध्यति न तु कृतौ इति शाब्दिकानां गभीरा विचारा अस्मिन् लघुशोधे युक्त्या सिद्धाः सन्ति।

**निष्कर्षः**

वैयाकरणराद्धान्ते स्फोटसिद्धान्तो दार्शनिको रमणीयो निष्कर्षश्च दरीदृश्यते । तेषां मते अष्टविधेषु स्फोटेषु वाक्यस्फोटो मुख्यो वर्तते, तत्र प्रमाणं भूषणकारेणोक्तं यथा - "वाक्यस्फोटोऽति निष्कर्षे तिष्ठतीति मतस्थितिः" इति तत्त्ववादीनां सार्वजनीनः सिद्धान्तः सिद्धश्च सर्वैरेवाङ्गीकारो विद्यते। लोके च वाक्यादेव निराकाक्षार्थप्रतीतिर्जायते। तस्य सम्पादनं नैकविधपदैः सिद्ध्यति। अत एवोक्तम् - "पदसमूहो वाक्यम्" अर्थसमाप्तौ समर्थः" तच्च पदं सुप्तिङन्तम् भवति। वाक्यस्य च मुख्यं लक्ष्यं लोके निराकाङ्क्षार्थबोधनमेव विद्यते । यद्यपि केवलवाक्यत्वसम्पादनमेव व्याकरणशास्त्रस्य परियोजनं मन्यते अपि तु निराकाङ्क्षार्थबोधनेन प्रज्ञाभावनमपि विशिष्टं प्रयोजनं वर्तते। तस्मात् केवलसुबन्तपदसमूहेन तिङन्तपदसमूहेन वा तादृशार्थबोधाजनकत्वात् सुप्तिङन्तचयो वाक्यमिति सिद्धान्तितम् । शोधेऽस्मिन् वाक्यत्वसम्पादनप्रधानीयभूतानां तिबाद्यादेशानां तत्स्थानिकानां लडादीनां तदादेशानां च कर्ता - कर्म - संख्या - कालाद्यर्थरूपाणाञ्चार्था निर्धारिताः सन्ति । पुनश्च वैयाकरणानां मते लकाराणां शक्तिः कर्तरि विद्यते न तु कृतौ इति, तिबाद्यादेशानां च "लः कर्माणि च भावे चाऽकर्मकेभ्यः" "वर्तमाने लट्" "अनद्यतने लुट्" "स्यतासी लृलुटोः" 'अनद्यतने लङ्' 'लुङ्' 'द्वेकयोर्द्विवचनैकवचने' 'बहुषु बहुवचनम्' इत्यादीनां पाणिनीयसूत्राणामनुशासनेन कर्तृकर्मसङ्ख्याकालरूपा अर्था निर्धारिता विद्यन्ते तेषां शक्तिनिर्धारणं परमतालोचनेन स्वमतस्य सम्यक् स्थापनमेवात्र लघुशोधस्य तात्पर्यमिति निष्कृष्टिः।

**सन्दर्भसामग्री**


कौण्डभट्टः (वि.सं.२०४५), *वैयाकरणभूषणसारः*, आद्याप्रसादमिश्रकृतया सावित्रीटीकया सहिताः, सम्पूर्णनन्दसंस्कृतविश्वविद्यालयः।

कौण्डभट्टः (सन्१९६८) , *वैयाकरणभूषणसारः*, प्रभाव्याख्यया दर्पणव्याख्यया च समुल्लसितः, श्री जानकीशरण (सुर्य) मुद्रणालयः।

गौडः, अशोककुमारः (सन् १९९६), *वैयाकरण- प्रबन्धसंग्रहः*, भारतीय- विद्या- संस्थानम्।

ठक्कुरः, रमाकान्तः (वि.सं.२०५३), *प्रबन्धामृतम्* , चौखम्बा संस्कृत सीरिज अफिस के.३७/९९ गोपाल मन्दिर लेन।

दीक्षितः, भट्टोजी, (वि.सं.२०४०), *वैयाकरणसिद्धान्तकौमुदी*, सतत्त्वबोधिनी, मुम्बय्यां क्षेमराज श्रीकृष्णदासश्रेष्ठिना स्वकीये "श्रीवैकङ्कटेश्वर" स्टिम- मुद्रणालये सम्मुद्र्य प्रकाशिता।

पतञ्जलिः (सन्१९९५), *व्याकरणमहाभाष्यम्*, चारुदेवशास्त्रिणा लिखितेन हिन्दी - अनुवादस्तथा विवरणेन सहितम्, मोतीलालबनारसीदासः।

पाणिनिः (सन् १९३२), *अष्टाध्यायी,* गोपालशास्त्रिसम्पादिता पदच्छेद - वृति वार्तिक - टिप्पणीसहिता, चौखम्बा- सुरभारती-प्रकाशनम्।

भट्टाचार्यो गदाधरः (सन्१९८८) , *व्युत्पत्तिवादः*, १ ई.पी.सी बनर्जी रोड।

भट्टो नागेशः, (वि. सं.२०४७) , *वैयाकरणसिद्धान्तलघुमञ्जूषा*, सम्पूर्णानन्द - संस्कृत - विश्वविद्यालयः।

भट्टो नागेशः वि.सं.२०५४) , *परमलघुमञ्जूषा*, जयशङ्करलालेन लिखितया बालबोधिन्या टीकया सहिता, कृष्णदास - अकादमी, पो. ना. १११८ के. ३७/११८ गोपाल मन्दिर लेन २२१००१।

भर्तृहरिः (वि.सं.२०७३), *वाक्यपदीयम्* , कुलपतेः प्रो. यदुनाथप्रसाददुबे महोदस्य प्रस्तावनया विभूषितम्, सम्पूर्णानन्द - संस्कृत - विश्वविद्यालयः।

मिश्रः, केशवः (सन्२००४) , *तर्कभाषा* ,बदरीनाथशुक्लस्य व्याख्यया सहिता, मोतिलाल - बनारसीदासः।